© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# गद्यशिक्षणस्वरुपसमीक्षा



**डा.नीलाभतिवारी**
**सहायकाचार्यः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**श्रीसदाशिवपरिसरः, पुरी**

अपाद् शब्दस्य प्रयोगेण गद्यस्य स्वरूपं निर्धारयति साहित्यिकः दण्डिमहोदयः। यस्य रचनायां छन्दशास्त्रस्य गण- मात्रा- यति- इत्यादीनां प्रयोगो न भवति, ये च बाधामपि न जनयन्ति तत् गद्यम्। शब्दार्थयुक्तभाषासमूहस्य सामान्यकथोपकथनेन यन्निगद्यते तत् गद्यम्। अर्थात् आचार्यविश्वनाथः वदति यत् छन्दबन्धहीना शब्दार्थयोजना गद्यमस्ति।

उक्तमस्ति **गद्यं कवीनां निकषं वदन्ति** गद्यं कवीनां कवित्वस्याधारः अस्ति। गद्यं कवीनां विद्वत्तां प्रतिपादयति। गद्यसाहित्यं दृष्ट्वा वक्तुं शक्यते यत् कस्य कीदृशं गभीरज्ञानं विद्यते इति। गद्यलेखनसमये सावधानेन भाव्यम्। कथमित्युक्ते गद्यं व्याकरणदृष्ट्या, भावप्रकाशनदृष्ट्या वा महत्वपूर्णं विशिष्टसाहित्यं भवति। अतः गद्यसाहित्यस्य श्रेष्ठत्वं समाजे दरीदृश्यते। संस्कृतसाहित्यवाङ्मये गद्यसाहित्यस्य प्रयोगः प्रारम्भिककालात् विद्यते। गद्यं वेदेष्वपि दृश्यते यथा ब्राह्मण- आरण्यक- उपनिषद्ग्रन्थेषु च। तैत्तिरीयसंहितायामपि गद्यस्य निदर्शनं प्राचुर्येण प्रत्यवलोक्यते। उपनिषदि पद्यानाम् अपेक्षया गद्यस्वरूपमधिकं सुविस्तृतं वर्त्तते इति।

गद्यमिति शब्दः गद् धातोः निर्गतः, यस्यार्थः स्पष्टवचनमिति। अर्थात् स्पष्टपठनं यत्र भवति तत् गद्यसाहित्यम्। आचार्यविश्वनाथमतेन **वृत्तबन्धोऽज्झितं गद्यम्** (सा.द.6/330) छन्दबन्धरहितशब्दार्थयोजनं गद्यम्। काव्यादर्शे आचार्यदण्डी कथयति अथादः पदसन्तानो गद्यम् (काव्यादर्शः 6/23) अर्थात् सुबन्ततिङन्तप्रयुक्तपदसमपदाये गंगायात्रादिनिपातपदस्याभावः गद्यम्। कोशकाराः वदन्ति स्पष्टः अनलङ्कृतभाषायां शब्दार्थः इत्यस्य उपयोगो यत्र भवति तत् गद्यम्। अरबी तथा च उर्दुभाषायां गद्यस्य नाम 'अस्र', अर्थात् 'इबारत' इति। 'नज्म' इत्यस्य विपरीतः भावः गद्यमिति। गद्यसाहित्यस्य निर्माणं सावधानेन कर्त्तव्यम्। कवि स्वगुणशैलीं विनियोज्य गद्यसाहित्यस्य निर्माणं करोति।

संस्कृतगद्यसाहित्यस्य उत्पत्तिः वैदिककालादेव अभवत्। कृष्णयजुर्वेदे, ब्राह्मणे, उपनिषदि च गद्यस्वरूपं प्राप्यते। निरुक्तवेदाङ्गे, महाभारते च गद्यरचना प्राप्यते। पतञ्जलेः विश्वविख्यातं महाभाष्यं गद्यशैल्याः उत्कृष्टं निदर्शनमिति बुधैः अङ्गीक्रियते। श्रीमद्भागवते तथा च विष्णुपुराणे अपि गद्यं प्राप्यते।

**संस्कृतगद्यसाहित्यम्** –

- वैदिकगद्यम् – गद्यमिदम् अतीवसारल्येन स्वभावं प्रकाशयति। अत्र गद्यस्वरूपं समासरहितम् उपमाद्यलङ्काररहितञ्च वर्त्तते।
- लौकिकं गद्यम् – अस्य त्रयः भागाः सन्ति। यथा –
  - **पौराणिकगद्यम्** –
    पौराणिकगद्यं महाभारते श्रीमद्भागवते विष्णुपुराणे च प्राप्यते।
  - **शास्त्रीयगद्यम्** –

शास्त्रीयगद्यम् शब्दमाधुर्यं न प्रतिपादयति। अत्र सिद्धान्ताः पूर्णरूपेण प्रतिपादिताः सन्ति । अत्र उदाहरणं पतञ्जलेः महाभाष्यं, आचार्यशङ्करस्य ब्रह्मसूत्रभाष्यम् इति ।

- **साहित्यिकगद्यम्** –

काव्यस्वरूपवत् अस्य आनन्दं प्राप्यते अतः काव्यनाम्ना व्यवह्रियते । एतत् गद्यकाव्यम् इति उच्यते। प्रारम्भिकदशायां दण्डी-सुबन्धु - बाणभट्टादीनां कवीनां रचनासु गद्यस्वरूपं प्राप्यते इति।

**गद्यस्य विशेषताः** –

1. संस्कृतवाङ्मये गद्यस्य विशेषता अस्ति अस्य संक्षिप्तता। अन्यासु भाषासु यत् एकपुटकेन भवति तत् अत्र एकस्यां पंक्तौ एव वक्तुं शक्यते । एका एव पंक्ति सम्पूर्णविवरणं प्रतिपादयति।
2. संस्कृतगद्यमाध्यमेन अनुप्रयुक्तव्याकरणस्य ज्ञानं सुष्ठुरूपेण छात्राः प्राप्नुवन्ति। यथा – वाक्यसंरचना- उपसर्ग – प्रत्यय-सन्धि-समासदीन् सारल्येन ज्ञास्यन्ति इति ।
3. संस्कृतवाङ्मये एव केवलं गद्यपद्ययोः मिश्रणं कृत्वा काव्यरचना क्रियते इत्यतः अत्र द्वयोः ज्ञानं प्रारम्भिकरूपेण प्राप्तुं शक्यते ।
4. संस्कृतगद्यमाध्यमेन भावनायाः अभिव्यक्तिः सुष्ठुरित्या कर्तुं शक्यते । सः भावः मानवानां विशिष्टार्थे भवतु अथवा सामान्यार्थे भवतु इति .
5. संस्कृतगद्यसाहित्ये अपि पद्यसदृशी सरसता सरलता च विद्यते । विना छन्दसा अपि माधूर्यं प्रतिभातीति। अतः कादम्बरी, वासवदत्ता, दशकुमारचरितम् इत्यादिगद्यकाव्यमित्युच्यते (Lyrical Prose) ।
6. संस्कृतगद्यमाध्यमेन दार्शनिकवैज्ञानिकतत्त्वानामुत्पत्तिः भवति तादृशानां गद्यानां ज्ञानं अनायासेन प्राप्तुं शक्यते ।

**गद्यशिक्षणस्योद्देश्यानि** –

- भाषातत्त्वानां ज्ञानं यथा – उच्चारणस्य, वर्त्तनीनाम्, अर्थस्य, सन्धेः, समासस्य, प्रकृतिप्रत्यययुक्तशब्दानां च ज्ञानम्।
- विषयवस्तुज्ञानं यथा- सांस्कृतिकम्, पौराणिकम्, व्यावहारिकम्, वैज्ञानिकम्, सामाजिकम्, राजनैतिकं च विषयवस्तुनां ज्ञानम्।
- अर्थग्रहणात्मक-अवबोधात्मककौशलानां विकासः। यथा- श्रुत्वा अर्थग्रहणमथवा पठित्वा अर्थग्रहणम्।
- अभिव्यक्त्यात्मक -अभिरुच्यात्मक - अभिवृत्यात्मककौशलानां विकासः ।
- कथामाध्यमेन चरित्रनिर्माणम्, कल्पनाशक्तेः विकासः, विवरणशैल्याः परिचयः च।
- सन्दर्भवर्णनेन वर्णनाशैल्याः विकासः, प्राकृतिकविषयेषु प्रेमभावनायाः जागरणम्।
- जीवनीवाचनेन भूतकाले स्थितानां वीराणां महापुरुषाणां विषये ज्ञानम्, चरित्रविकासाय प्रेरणा, जीवनस्य सर्वश्रेष्ठादर्शानां ज्ञानम्, निबन्धपाठनेन जिज्ञासायाः विकासः, बौद्धिकशक्तेः विकासः।
- नाटकेन नाट्यकलायाः ज्ञानम्, सम्भाषणपद्धत्याः परिचयः, संवेगानां ज्ञानम्, रसानुभूतिः, आनन्दानुभूतिः, नाटकाभिनयेन आत्माभिव्यक्तिः।
- गद्यशिक्षणेन मानसिकशक्तेः सर्जनाशक्तेश्च विकासो भवति।
- गद्यशिक्षणद्वारा व्याकरणतत्त्वानां विश्लेषणं ज्ञातुं शक्नुमः।

सम्प्रति विविधस्तरेषु गद्यशिक्षणस्य उद्देश्यानि अवलोकयामः –

**विशिष्टगद्यशैलीनाम् उद्देश्यानि-**

- कथाशिक्षणम्-
  कथायाः ज्ञानम् , कल्पनाशक्तेः विकासः , चरित्रनिर्माणम् , कथाकथनशैली परिचयः च |
- वर्णनशिक्षणम् –
  प्रकृतिं प्रति प्रेमोत्पादनम्, प्राकृतिक सौन्दर्यवर्णनक्षमतोत्पादनं च |
- जीवनपरिचयशिक्षणम्-
  महापुरूषाणां परिचयप्रदानम् , चारित्रिक विकासः , जीवनमूल्यानां ज्ञानकरणं च |
- निबन्धशिक्षणम्-
  विषयस्य परिचयप्रदानम्, जिज्ञासायाः विकासः , बौद्धिकशक्तेः संवर्धनम् , विचारविश्लेषणक्षमतायाः विकासः च |
- नाटकशिक्षणम् –
  नाटकशैल्याः परिचयप्रदानम्, संवादपद्धत्याः परिचयः, आत्माभिव्यक्तये अवसरप्रदानम्, आनन्दानुभूतिः, संवेगप्रकटीकरणशैल्याः परिचयः च |

गद्यपाठस्य प्रकारौ – अध्ययनदृष्ट्या गद्यपाठानां विभाजनं द्विधा कर्त्तुं शक्यते । तच्च-

1. **गहनाध्ययनगद्यपाठाः** – अत्र वर्णनं जीवनवृत्तान्तः, यात्रासंक्षेपणम्, निबन्धादयः शैल्यः सम्मिलिताः भवन्ति । एतेषां पाठानां उद्देश्यानि भवन्ति यत् – अर्थग्रहणम्, विषयवस्तुज्ञानम्, भाषिकतत्त्वानां ज्ञानम्, वाचनम्, रुचिः, अभिरुचिः अभिवृत्तिश्च ।
2. **सरलाध्ययनगद्यपाठाः** – छात्रेषु पठनरुचेः विकासाय, द्रुतगत्या मौनवाचनसामर्थ्योत्पादनाय च एते पाठाः भवन्ति । एतेषु कथाः, संवादाः, नाटकम् इत्यादयः प्राधान्यं भजन्ते । एतेषां पाठानाम् उद्देश्यानि भवन्ति यत् अर्थग्रहणम्, स्वरग्रहणम्, केन्द्रीयभावावबोधः, चारित्रिकविकासश्च ।

## गद्यशिक्षणप्रणाली-

गद्यस्य शिक्षणं सामान्यं नास्ति अतिविशिष्टं वर्तते | गद्यशिक्षणावसरे केषाञ्चन सूक्ष्माशांनां चिन्तनम् आवश्यकं वर्तते | तेषाम् अंशानां ज्ञानानन्तरमेव कश्चन् गद्यशिक्षणे प्रवीणः भवितुम् अर्हति | गद्यशिक्षणस्य प्रणालीद्वयस्य चर्चा अत्र भविष्यति व्यवहारवादाधारितप्रणाली अपि च रचनावादाधारितप्रणाली।

- व्यवहारवादाधारितप्रणाली-

इयं प्रणाली प्रायः बहुकालात् भारते संस्कृतशिक्षणाय प्रचलति। अस्याः मुख्यांशाः सन्ति- वाचनं व्याख्या विचारविश्लेषणञ्च | एतेषां विवरणम् एवं प्रकारेण द्रष्टुं शक्नुमः-

| वाचनम् | व्याख्या | विचारविश्लेषणम् |
|---|---|---|
| • आदर्शवाचनम्<br>• अनुवाचनम्<br>• मौनवाचनम् | • शब्दानां व्याख्या<br>• वाक्यानां व्याख्या<br>• सूक्तीनां व्याख्या<br>• अनुच्छेदव्याख्या | • वाक्यविचारविश्लेषणम्<br>• अन्तर्कथाविचारविश्लेषणम्<br>• रचनाविशेषविचारविश्लेषणम् |

**सोपानानि-**

अध्यापनकाले प्रायः गद्यस्यैव शिक्षणमाधिक्येन भवति, अतः गद्यशिक्षणे क्रमबद्धता स्पष्टता उद्देश्यपूर्त्तिक्षमता च शिक्षकस्य भवेदेव। अत्र वयं संस्कृतगद्यशिक्षणस्य प्रचलितप्रक्रियायाः अध्ययनं किञ्चित् कुर्मः। कक्षायां प्रवेशकरणादारभ्य बहिर्गमनपर्यन्तं कथं छात्राः उत्साहं सक्रियतां च प्रदर्श्य अधिगमं कर्त्तुं शक्नुवन्ति तदर्थं वयं सोपानक्रमेण चर्चां कुर्मः।

1. कक्षारम्भः – प्रवेशानन्तरं छात्रैस्सह अभिवादनं सम्पाद्य अध्यापकः श्यामफलके विषय- पाठस्य नाम, दिनाङ्कादीन् प्रारम्भिकबिन्दून् लिखति। लेखनसमये अपि मौनं न भवेत् शिक्षकः। छात्रैः सह ह्यस्तनाध्यापितविषयस्य वा अन्यां काचित् सहजचर्चां कुर्यात्।
2. उद्देश्यानि – ‘ प्रयोजनमुद्दिश्य न मन्दोऽपि प्रवर्त्तते’ चेत् कथं शिक्षकः पाठयितुं शक्ष्यति। अतः उद्देश्यानां प्रकारद्वयमपि अध्यापकेन ध्यातव्यम्। तच्च-

➢ सामान्योद्देश्यानि – एतानि उद्देश्यानि एकस्मिन् कालांशे प्राप्तुं योग्यानि नैव भवन्ति। अपि तु एकस्य वर्षस्य वा शिक्षणस्तरस्य उद्देश्यानि भवन्ति। अध्यापकः सम्पूर्णे वर्षे क्रमशः एतेषां प्राप्तये प्रयत्नं करोति।

➢ विशिष्टोद्देश्यानि – एतानि उद्देश्यानि एकस्मिन् कालांशे प्राप्तुं योग्यानि भवन्ति। शिक्षकः छात्राणां स्तरम् उपलब्धसंसाधनं समयं स्वक्षमतां च विविच्य एतेषां लेखनं करोति। उद्देश्यानां लेखनाय श्रीहर्षेण नैषधे यथा कथितम् ‘अधीतिबोधाचरणप्रचारणैः’ तथा विभज्य रचना करणीया। यथा-

(क) **अधीतिः** – छात्रः विषयस्याध्ययनं करोति, वाचनं करोति, कण्ठस्थीकरणञ्च करोति।

(ख) **बोधः** – अस्मिन् स्तरे छात्राः विषयस्य सम्प्रत्ययम् अवगच्छन्ति। विषयं बुद्धिस्थं कुर्वन्ति। विषयस्य मुख्यभावस्य स्पष्टीकरणं भवति। अतः विशिष्टोद्देश्यानि अपि अंशमिदं मनसि निधाय शिक्षकैः रचनीयानि।

(ग) **आचरणम्** – अस्य स्तरस्योद्देश्येषु छात्रः अधीतस्य बुद्धिस्थस्य विषयस्य स्वव्यवहारे प्रयोगं कर्त्तुं समर्थः भवति।

(घ) **प्रचारणम्** – स्तरेऽस्मिन् छात्रः स्वव्यवहारे विद्यमानं गुणम् अन्येषां व्यवहारे आनेतुं प्रयत्नं करोति। स्वच्छता- आज्ञापालन- करुणा- परोपकारादीनां प्रचारः अत्र उद्देश्यरूपेण भवितुमर्हति।

आधुनिकसन्दर्भेषु उद्देश्यलेखनाय वयं ब्लूम महोदयस्य वर्गीकरणमपि अनुपालयितुं शक्नुमः। तच्च –

**शैक्षिकोद्देश्यानि**

| संज्ञानात्मकम् | भावात्मकम् | मनोगत्यात्मकम् |
| --- | --- | --- |
| स्मरणात्मकम् | आग्रहणम् | प्रत्यक्षीकरणम् |
| अवबोधात्मकम् | अनुक्रिया | व्यवस्था |
| अनुप्रयोगात्मकम् | आकलनम् | निर्देशनात्मकानुक्रिया |
| विश्लेषणात्मकम् | संघटनम् | कार्यप्रणाली |
| मूल्याङ्कनात्मकम् | मूल्यप्रणाल्याः चरित्रीकरणम् | जटिलप्रत्यक्षानुक्रिया |
| सर्जनात्मकम् | | |

ब्लूमवर्गीकरणे प्रत्येकम् आयामस्य स्तराणि विविच्य तत्र काः क्रियाः अन्तर्भवन्ति तासां सूची अपि प्रदत्ता। वयं सूच्यानुसारं स्वविशिष्टोद्देश्ये क्रियायाः चयनं कर्तुं शक्नुमः। विशिष्टोद्देश्य लेखने चत्वारः अंशाः ध्यातव्याः। उदाहरणार्थं पश्यामः एकम् उद्देश्यम् –

**कक्षाशिक्षणानन्तरं छात्राः प्रदत्तकथातः पञ्च नपुंसकलिंग बहुवचनस्य शब्दानां संकलनं कर्तुं शक्ष्यन्ति।**

विशिष्टोद्देश्येऽस्मिन् चत्वारः अंशाः प्रमुखाः भवन्ति। तेषां विवेचनम् एवं कर्तुं शक्नुमः-

- **कर्त्ता** – अत्र छात्राः कर्त्तारः सन्ति।
- **अपेक्षितव्यवहारः** – अत्र 'संकलनं कर्तुं शक्ष्यन्ति' इति व्यवहारत्वेन परिगण्यते।
- **परिस्थितिः** – अत्र " कक्षाशिक्षणानन्तरं प्रदत्तकथातः" इति परिस्थितिः अस्ति।
- **स्वीकार्यतास्तरः** – ' पञ्च नपुंसकलिंगबहुवचनशब्दाः' अत्र स्वीकार्यतास्तरत्वेन विद्यन्ते।

गद्यशिक्षणे विशिष्टोद्देश्यलेखनावसरे एते अंशाः अनिवार्यतया पालनीयाः।

3. **सहायकसामग्री** – शिक्षणावसरे आवश्यकसामग्र्यः पाठनात् प्रागेव कक्षायां स्थापनीयाः। पाठने प्रयोगावसरे एव तस्या नूतनसामग्र्याः अनावरणं करणीयं नोचेत् नूतनसामग्रीं दृष्ट्वा छात्राणाम् आकर्षणं पाठस्थाने सामग्र्यां भविष्यति। सामग्र्यः द्विधा विभज्यन्ते। प्रतिदिनोपयोगे आयान्ति चेत् सामान्योपकरणानि भवन्ति। यथा – श्यामपट्टः, सुधाखण्डः, मार्जनी, आकुञ्चनश्यामफलकम् आदयः। पाठानुगुणं प्रकरणानुगुणं विशिष्टोपकरणानि भवन्ति। यथा- चित्राणि, प्रतिकृतिः, मानचित्रम्, प्रक्षेपकयन्त्रम्, उर्जविन्दुप्रस्तुतिकरणम्, चलचित्रादयः सामग्र्यः।
4. **पूर्वज्ञानम्** – शिक्षणे सरलतायै सहजतायै बोधगम्यतायै च आवश्यकं वर्त्तते 'ज्ञातात् अज्ञातं प्रति' इति शिक्षणसूत्रस्य परिपालनम्। एतदर्थं गद्यपाठनात् प्राक् छात्राः तस्मिन् विषये किं किं जानन्ति ? इति शिक्षकेण ज्ञातव्यम्। तदनु शिक्षणस्य आरम्भं कृत्वा पाठस्य प्रवर्धनं कर्त्तव्यम्।
5. **प्रस्तावना** – स्वकीयं पूर्वज्ञानं प्रयुज्य छात्राः नूतनज्ञानं प्रति इत्युक्ते पाठं प्रति जिज्ञासवः भवेयुः। पाठं पठितुम् उद्युक्ताः भवेयुः। एतदर्थं प्रस्तावना क्रियते। एतदर्थं विगताध्ययनसामग्रीसम्बद्धाः पूर्वज्ञानसम्बद्धाश्च प्रश्नाः शिक्षकेण प्रष्टव्याः। अथवा कथा-श्लोक-संवादादीन् भावयित्वा प्रस्तावना कर्तुं शक्यते। चित्र-मानचित्रम्-आरेखादिनां प्रदर्शनेन अपि प्रस्तावना भवितुम् अर्हति। समसामयिकघटनाक्रमेण साकं सम्बन्धं संस्थाप्य अपि प्रस्तावना कर्तुं शक्यते।

6. **पाठप्रवर्धनम्** – सोपानेऽस्मिन् प्रकरणस्य शिक्षणम् आरभते । पाठस्य प्रवर्धनं शनैः शनैः क्रमशः क्रियते । अतः पाठप्रवर्धनस्य अङ्गतया चत्वारि सोपानानि सन्ति । -

- **आदर्शवाचनम्** – एतदर्थं छात्रेभ्यः 'निर्दिष्टं पृष्ठम् उद्घाटयन्तु' इति निर्देशः दातव्यः । तदनु पाठोचितभावैः, कक्षोचितस्वरेण, विरामादिचिह्नादीन् प्रयुज्य, समुचितगतिः स्वराघातादीन् अंशान् प्रयुज्य सुन्दरतया पाठ्यवस्तुनः वाचनं शिक्षकः करोति । वाचने शुद्धता स्पष्टता च भवति ।
- **अनुकरणवाचनम्-** शिक्षकेण कृतं पाठ्यांशवाचनस्य अनुकरणवाचनाय कश्चित् छात्रः निर्दिश्यते। तस्य च सहपाठिनःतस्य त्रुटीनां चिह्नाङ्कनं कुर्वन्ति। अपि च ध्यानेन शृण्वन्ति। शिक्षकेण अनुकरणवाचनाय पङ्क्तिबद्धतया न कृत्वा उपविष्टेषु छात्रेषु कदाचित् मध्यभागात् वा कदाचित् अन्तिमभागात् अपि छात्राः आदिष्टव्याः। येन सर्वेषां छात्राणां पाठ्यांशे अवधानं भविष्यति। नो चेत् छात्राः पङ्क्त्याधारेण स्वकीयं स्थानं विचिन्त्य जाग्रताः न भविष्यन्ति। अपि च शिक्षकस्य ध्यानम् इतोपि स्यात् यत् सर्वेभ्यः छात्रेभ्यः एकस्मिन् सप्ताहे वाचनस्य अवसरः अवश्यं भवेत्। अन्यथा केवलं कैश्चित् छात्रैः एव प्रतिदिनम् अनुवाचनं क्रियते।
- **अशुद्धिसंशोधनम्-** अनुकरणवाचनस्य समाप्त्यनन्तरं छात्रैः अशुद्धोच्चारितशब्दाः संशोधनीयाः। संशोधनसमये अशुद्धशब्दस्य छात्रैः एव संशोधनाय प्रयासाः करणीयाः। यदि छात्राः असमर्थाः भवन्ति तर्हि शिक्षकः शुद्धाशुद्धोचारितयोः शब्दयोः श्यामपट्टे विलिख्य शुद्धोच्चारणस्य अभ्यासं कारयेत्।
- **काठिन्यनिवारणम् -** सोपानेऽस्मिन् शिक्षकेण पाठ्यांशे आगतानां कठिनशब्दानां विविधैः युक्तिभिः छात्रैः एव संशोधयितुं यत्नः करणीयः। काठिन्यनिवारणाय प्रमुखतया ये युक्तयः प्रयुज्यन्ते, तेषां वर्गीकरणम् एवं कर्तुं शक्यते-

| उद्बोधनयुक्तयः | प्रवचनयुक्तयः | स्पष्टीकरणयुक्तयः |
|---|---|---|
| • प्रतिकृतिः<br>• चित्रं रेखाचित्रं च<br>• प्रत्यक्षवस्तुदर्शनम्<br>• प्रत्यक्षक्रियादर्शनम् | • अनुवादयुक्तिः<br>• कोषयुक्तिः<br>• परिभाषायुक्तिः<br>• टीकायुक्तिः | ➢ व्युत्पत्तियुक्तिः –<br>• उपसर्गव्युत्पत्तिः<br>• प्रत्ययव्युत्पत्तिः<br>• सुबन्तव्युत्पत्तिः<br>• तिङन्तपदव्युत्पत्तिः<br>• सन्धिविच्छेदः<br>• समासविग्रहः |
| | | ➢ तुलनायुक्तिः -<br>• पर्यायवाचिशब्दैः<br>• विलोमार्थीशब्दैः<br>• अनेकार्थीशब्दैः<br>• समोच्चारितभिन्नार्थकशब्दैः |

**(क)उद्बोधनयुक्तयः** – प्रारम्भिकावस्थायां मौखिककार्याय एतासां युक्तीनां प्रयोगः भवति। एताभिः युक्तीभिः नूतनशब्दानाम् अर्थावबोधः दृश्यश्रव्योपकरणै वा अभिनयेन छात्राणां भवति। अत्र प्रामुख्येन अन्तर्भवन्ति -

- **प्रत्यक्षवस्तुप्रदर्शनम्** – बालकः कस्यापि शब्दस्य अर्थं प्रत्यक्षवस्तुं दृष्ट्वा सारल्येन ज्ञातुं शक्नोति। यथा- नासिका, उदरम्, मस्तकं चेत्यादिशब्दानां स्पष्टतायै शिक्षकः स्वशरीरस्य माध्यमेन वा कस्यचिद् छात्रस्य शरीरमाध्यमेन शब्दार्थं बोधयितु शक्नोति। यथा- इयं नासिका, एतत् उदरं च।
- **प्रत्यक्षक्रिया(अभिनयाधारिता)**- केषाञ्चित् क्रियापदानाम् अर्थबोधनाय अभिनययुक्तिः उत्तममाध्यमत्वेन भवति। यथा- आगच्छति, गच्छति, पिबति, हसति, पिबामि इत्यादिपदानां स्पष्टतायै कमपि बालकमाहुय कक्षायाः बहिः प्रेषयन्- गच्छति, पुनः अन्तः आहूय- आगच्छति एवं तं बालकं हसनाय निर्दिश्य हसति, एवम् अभिनययुक्त्या पदार्थान् अवबोधयितु शक्यते।
- **प्रतिकृतिः** – मयूरः, कपोतः, बुद्ध, ताजमहलम्, आदिशब्दानामर्थं प्रतिकृतिभिः बोधयितु शक्यते।
- **चित्रं रेखाचित्रं च**- कथा-निबन्धरचनयोः अङ्गतया उद्यानम्, सिंहः, काकः, शशकः इत्यादीनां शब्दानां चित्रेण बोधं कारयितुं शक्यते। तथा च चित्राणां साहाय्येन विषयस्य अर्थमपि स्पष्टयितुं शक्यते। पशुपक्षीणां संस्कृतनामानाम् अर्थं तेषा रेखाचित्रेण सरलतया स्पष्टीकर्तुं शक्यते।

**उद्बोधनयुक्तीनां लाभाः** –

1. नूतनशब्दानामवबोधनाय एषा उत्तमा युक्तिः अस्ति।
2. अत्र छात्राः उद्बोधनस्य उत्तरं दातु बौद्धिकरूपेण प्रयत्नरताः भवन्ति।
3. अनया युक्त्या छात्रस्य स्मरणशक्तेः विकासः, विषयश्च संज्ञाने स्थायीरूपेण तिष्ठति येन छात्रः कदाचिदपि तं विषयम् अतिशीघ्रं स्मर्तुं शक्नोति।
4. श्यामपट्टे निर्मितचित्रेण रेखाचित्रेण च विविधक्रियाभिः प्रतिकृतिभिः अर्थावबोधः झटिति भवति।

- **उद्बोधनयुक्तीनां न्यूनताः** –

1. इयं युक्तिः सर्वव्यापिका न भवति।
2. एतादृशः अपि शब्दास्सन्ति ये कस्यचित् वस्तुनः द्योतकाः न भवन्ति सन्धियुक्तानां समासयुक्तानां शब्दानाम् अवबोधने जटिलतामुत्पादयन्ति।
3. बृहत्शब्दानाम् व्याख्यायाम् इयं युक्तिः असमर्था।

**(ख)प्रवचनयुक्तयः**:- यस्य शब्दस्य अवबोधने क्लिष्टता अनुभूयते तत्र शिक्षकः येन केन माध्यमेन प्रवचनरीत्या अर्थान् बोधयति। अत्र प्रामुख्येन याः युक्तयः अन्तर्भवन्ति ताश्च-

- **अनुवादयुक्तिः** - इयं युक्तिः शिक्षकाणाम् सर्वमान्ययुक्तिरस्ति। शिक्षकः नूतनशब्दानां वाक्यानां च खण्डशः छात्राणां मातृभाषया अर्थान् श्यामपट्टे लिखति। पाठ्यपुस्तके पाठ्यांशस्य अर्थाः प्रायशः पुस्तकस्य आरम्भे अथवा अन्तिमे विलिखिताः भवन्ति। एवं केषाञ्चन शब्दानाम् अनुवादः शिक्षकः स्वबुद्ध्या कर्तुं शक्नोति।

**अनुवादयुक्त्याः लाभाः**:-

इयं युक्तिः सरला सुगमा च वर्तते। छात्राः कठिनशब्दानां सरलार्थान् स्वटिप्पणीपुस्तिकायां लिखन्ति रटन्ति च अनेन छात्राणां शब्दभण्डारे वृद्धिर्जायते। नूतनशब्दावल्याः स्मरणानन्तरं छात्राः अनुच्छेदं रचयितुं समर्थाः भवन्ति।

**अनुवादयुक्त्याः सीमाः**:-

प्रायः छात्राः सर्वेषां शब्दानाम् अनुवादं ज्ञात्वा तेषां शब्दानां संस्कृतभाषायां प्रयोगं कर्तुम् असमर्थाः भवन्ति। अनया युक्त्या रटनशक्तेः एव विकासः भवति। छात्राः शब्दस्य मूलार्थात् संरचनायाः च वञ्चिताः भवन्ति। व्याकरणज्ञानस्य अभावः भवति।

➢ **कोषयुक्तिः** – एषा एका प्राचीना युक्तिरस्ति। अत्र कोषग्रन्थानां विशेषतः उपयोगः क्रियते यथा- अमरकोषः, हलायुधकोषः इत्यादीनां माध्यमेन अर्थावबोधनं कारयितुं शक्यते। उदाहरणार्थम्-

➢ **कोषयुक्त्याः सीमा**- इयं युक्तिः सर्वेषां अर्थाणाम् अवबोधनाय उत्तमयुक्तिः नास्ति। उपसर्गाणां प्रत्ययानां संयोगे नूतनशब्दानां निर्माणं भवति तत्र इयं युक्तिः सक्षमा न भवति। व्याकरणेन निष्पन्नाः कठिनशब्दाः संयुक्तपदानि ऐतिहासिकाः वा पारिभषिकशब्दाःयेषां सङ्ग्रहः कोषग्रन्थे न सम्भवति। तत्र अनया युक्त्या लाभस्य सम्प्राप्तिर्न भवति। परन्तु पर्यायशब्देभ्यः इयं सर्वाधिकोपयोगी युक्तिः अस्ति।

➢ **परिभाषाद्वारा**- केषाञ्चित् पारिभाषिकशब्दानाम् अर्थस्पष्टीकरणाय शब्दस्य पारिभाषिकरणं नितान्तमावश्यकं भवति। यथा- शिक्षाशास्त्रम्, सीमन्तोनयनम्, व्रतः, गन्धर्वःइत्यादयः। इयं युक्तिः तेभ्यः शब्देभ्यः उपयुकुता भवति ये शब्दाः विभिन्नानां शास्त्राणां प्रविधिशब्दाः भवन्ति इयं युक्तिः उच्चस्तराय उपयुकुता विद्यते।

➢ **टीकाद्वारा**- संस्कृतवाङ्मये लिखितानि साहित्यशास्त्राणि अनया युक्त्या व्याख्यायते। यदि अस्माकं प्राचीनसंस्कृतविद्वान्सः अस्याः युक्त्याः आविष्कारं नाकरिष्यन् तर्हि प्राचीनशास्त्राणाम् अवबोधने अस्माकं क्लेशः अभविष्यत्। वेदेषु सायणाचार्यः भाष्ये शङ्करस्य गीताभाष्ये अस्याः युक्त्याः प्रयोगः दृश्यते। कालिदासेन विरचिते साहित्ये मल्लिनाथेन टीका लिखिता। अत्र अनेका गुणास्सन्ति। इयं युक्तिः शब्दानां व्याख्यां करोति। तेषां भावं च स्पष्टयति। इयं युक्तिः काव्यगतगुणं प्रकटीकरोति। अत्र प्रसङ्गवत् कोषयुक्तिः व्युत्पत्तियुक्तिः , प्रसङ्गयुक्तिः , प्रयोगयुक्तिरपि यथास्थानम् आवश्यकतानुगुणं समाविशन्ति। एषः समन्वयविधिरपि कथ्यते।

**(ग) स्पष्टीकरणयुक्तयः** –यत्र अन्यासां युक्तिनां प्रयोगः अनुपयुक्तः भवति तत्र कठिनशब्दानाम् अवबोधनाय स्पष्टीकरणयुक्तयः आवश्यक्यः भवन्ति। व्युत्पत्तिः तुलना वाक्यप्रयोगः प्रसङ्गः चेति माध्यमैः कठिनशब्दानां स्पष्टीकरणं कर्तुं शक्यते।

➢ **व्युत्पत्तिः** – अनया युक्त्या शब्दस्य स्पष्टार्थं ज्ञानाय भाषायाः व्याकरणपक्षम् आलोड्यते। कठिनशब्दानां मूलाधारम् अन्विष्य तेन संयुक्तोपसर्गः तद्धितप्रत्ययः कृदन्तप्रत्ययः धातुः कारकम् इत्यादीनां विश्लेषणं भवति। अस्यां युक्त्यां वस्तुतः शब्दानां विस्तृतीकरणम् एव भवति। अत्र विस्तीर्य अन्तिमः निष्कर्षः कथ्यते। अत्र कस्यचिदपि शब्दस्य व्युत्पत्तिः इत्थं भवति यत् – एषः कः शब्द? कः धातुः? किं वा प्रत्ययं? एतेषां सर्वेषाम् अर्थः कः? तथा विशेषः कः निष्कर्षः? इत्यस्मिन् विषये व्युत्पत्तेः गुरुत्वारोऽपं क्रियते। यथा-

**(i)उपसर्गाणां व्युत्पत्तिः** – उपस्थितिः = उप +स्थितिः

**(ii)प्रत्ययानां व्युत्पत्तिः**- खादित्वा = खाद् + क्त्वा

**(iii)सुबन्तसर्वनामसंज्ञाशब्दानां व्युत्पत्तिः** – बालकेषु = बालकशब्दः पुल्लिङ्गः

सप्तमी बहुवचनम्

**(iv) लिङ्गान्तधातुपदानां व्युत्पत्तिः** – अत्र मूलधातुः पदं च (परस्मैपदी आत्मनेपदी, उभयपदी)

वाच्यानि (कर्तृवाच्यम् ,कर्मवाच्यम् ,भाववाच्यम् )

गणाः - (भ्वादिगणाः )

पुरुषः- (प्रथमः,मध्यमः,उत्तमः)

लकारः- (दशलकाराः)

वचनम् – एकवचनम्, द्विवचनं, बहुवचनम्

भू धातु,परस्मैपदी, कर्तृवाच्यम्, भ्वादिगणः लट्लकारः प्रथमपुरुषः एकवचनम्

एधि- अस् धातु, परस्मैपदी कर्तृवाच्यम् अदादिगणः, लोटलकारः मध्यमपुरुषः एकवचनम्।

**(v) सन्धिविच्छेदः**= दैत्यारिः – दैत्य+अरिः, अ+अ=आ, दीर्घसन्धिः।

सदैव= सदा+एव, आ+ए=ऐ वृद्धिसन्धिः।

**(vi) समासविग्रहः** – देवपतिः= देवानां पतिः, षष्ठीतत्पुरुषसमासः।

उपनगरम् =नगरस्य समीपम् अव्ययीभावसमासः।

- **तुलनायुक्तिः** – अनया युक्त्या शब्दस्य तुलनात्मकमर्थं ज्ञापयितुं शक्यते। एतादृशी तुलना पर्यायवाचिशब्देषु विपरीतार्थकशब्देषु च भवितुमर्हन्ति। यद्यपि पाठ्यांशे कश्चित् शब्दः आगच्छति चेद् सामान्यतः तस्य अर्थज्ञापनाय व्याख्या करणीया।

  - **विपरीतार्थकशब्देन**- गमनम् – आगमनम्

संश्लेषणम्- विश्लेषणम्

उत्तमः – अनुत्तमः

प्रातः – सायम्

  - **अनेकार्थीशब्दैः**

अर्थः- धनं, प्रयोजनम्।

गुरुः – आचार्यः, बृहत्, श्रेष्ठः, धारी।

नगः – पर्वतः. सर्पः ,अचलः।

मधुः – मदिरा, मधुरम्, चैत्रमासः

  - **समध्वनियुक्ताः भिन्नार्थकशब्दाः-**

गृहम् -ग्रहः

प्रसादः -प्रासादः

अचलः – अनिलः

- **वाक्यप्रयोगेण**- वाक्ये शब्दप्रयोगेण शब्दस्य सम्यकरूपेण व्याख्या भवति।

हतवान् प्रयोगः – रामः रावणं हतवान्।

प्रभृतेः प्रयोगः – शैशवात् प्रभृतिः।

दृश्यते इत्यस्य प्रयोगः - योग्योऽयं दृश्यते।

अलम् इत्यस्य प्रयोगा- अलं हास्येन।

- **अन्तःकथामाध्यमेन**- कदा- कदा कस्याः अपि संज्ञायाः अवबोधनार्थम् तथा कस्यचिदपि विशेषणस्य प्रयोगः स्पष्टकरणार्थम् अन्तःकथानां प्रयोगः कर्तुं शक्यते।

भागीरथ-प्रयत्नः- भागीरथेन गङ्गावतरणविशेष्यप्रतिपादनम्।

गुरुदक्षिणा- एकलव्यविषयप्रतिपादनम्।

पितृभक्तः – श्रवणकुमारस्य विषयप्रतिपादनम्।

दानवीरः –कर्ण-शिव्यो- विषयप्रतिपादनम्।

- **प्रसङ्गद्वारा**- विषयसामग्रीमध्ये अनेकाः शब्दाः आगच्छन्ति। येषां व्याख्यां कर्तुं तस्य ऐतिहासिकः भौगोलिकः पौराणिकः आलोचनात्मकः सङ्केतात्मकः च प्रसङ्गः निर्मातव्यः। एतादृशानां शब्दानां बोधनाय कथावर्णनम् प्रसङ्गस्य वा औचित्यं पूर्णविवरणं च दातव्यम्।

7. **बोधप्रश्नाः** - आदर्शवाचनानुवाचनकाठिन्यनिवारणानन्तरं किं च्छात्राणां अर्थावबोधः संजातः वा ? अस्य विषयस्यावगमनाय एवं च च्छात्राणां इतोपि बोधक्षमता वर्द्धनाय लघु लघु प्रश्नाः क्रियन्ते पुनः ते प्रश्नाः अत्यन्तं सरलाः भवन्ति ।

8. **अध्यापककथनम्** - सोपानेस्मिन् अध्यापकः स्वीयपाठ्यांशस्य सरलावबोधनाय पूर्णपाठ्यवस्तुनः विस्तृतव्याख्या च्छात्राणां पुरतः प्रस्तौति येन च्छात्राणां पाठ्यांशावबोधः भवेत् ।

**9. मौनवाचनम्** – विषये च्छात्राणां ध्यानकेन्द्रीकरणाय तथा एकाग्रतावर्द्धनाय अपि च पूर्णपाठ्यांशस्य गूढाध्ययनाय च मौनवाचनं क्रियते । मौनवाचनाय च्छात्रान् निर्दिश्य ते मौनेन पठन्ति न वा इतिज्ञानाय शिक्षकः निरीक्षणं करोति ।

10. **विचारविश्लेषणात्मकप्रश्नाः** - मौनवाचनानन्तरं पूर्णपाठ्यांशच्छात्राणां बुद्धौ आगतो न वा विषयं ज्ञातुं एवं च चिन्तनाभिव्यक्तिकुशलतादिक्षमतानां विकासाय सोपानेस्मिन् विचारविश्लेषणाधारिताः प्रश्नाः पृच्छयन्ते ।

11.कक्षाकार्यम् –पाठ्यांशस्य ये विशिष्टोदेश्यानि भवन्ति तेषु अनुप्रयोगात्मक-मूल्याङ्कनात्मक- विश्लेष्णात्मक- सर्जनात्मकोद्देष्यानां पूर्तये अत्र कक्षायां कार्याणि कार्यन्ते। सर्वे छात्राः सोपानेऽस्मिन् सक्रियाः भवन्ति। कार्याणि रोचकानि पाठ्यसम्बद्धानि च स्युः।

12. **मूल्यांकनप्रश्नाः** – पाठितपाठ्यवस्तुनः अवबोधच्छात्राणां अभवत् न वा इत्यस्य अभिज्ञानाय सोपानेस्मिन् मूल्यांकनप्रश्नाः पृच्छयन्ते । ये प्रश्नाः निर्दिष्टोद्धेश्याधारिताः भवन्ति अपितु वस्तुनिष्ठात्मकाः एवं च लघूत्तरात्मकाः भवन्ति ।

13. **गृहकार्यम्** - पाठनानन्तरं पाठसम्बद्धसर्जनात्मककार्याणि गृहे सिद्धकरणाय छात्रेभ्यः प्रदीयन्ते । कार्येस्मिन् अतिरिक्तप्रश्नानां उत्तराणि स्मरणे स्थापनाय अपि निर्दिश्यन्ते ।

इति शम्

संदर्भग्रन्थाः –


- Coulson, Michael. McGraw Hill Companies, 2003
- पाण्डेय, इन्दिराचरण. संस्कृतशिक्षणसमीक्षण, संपुर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी,1992
- मित्तल, संतोष. संस्कृतशिक्षण , आर लाल पब्लिशर्स, मेरठ, 2013
- शर्मा, रीटा और जैन, अमिता. संस्कृतशिक्षण ,आविष्कार पब्लिशर्स, जयपुर, 2005